आदौ मुख्यवार्ता:

•राष्ट्रम् अद्य पूर्वप्रधानमन्त्रिणं अटल बिहारी वाजपेयी वर्यं एकोत्तरैकशततमीं जयन्तीमालक्ष्य श्रद्धांजलिम् समर्पयति। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी अद्य लखनऊ नगरे पूर्वप्रधानमन्त्रिणं तस्मै समर्पितस्य राष्ट्र प्रेरणा स्थलस्य उद्घाटनं कृतवान् ।

•प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत्, सांसद्-खेल-महोत्सवः जनेषु आन्दोलनरूपेण विकसितः अस्ति, यस्मिन् समाजस्य प्रत्येकस्य वर्गस्य सहभागिता अस्ति।

•नवी मुम्बय्याः अन्ताराष्ट्रियविमानस्थानके अद्यारभ्य व्यावसायिक - विमानयानानि समारब्धानि।

•बाङ्ग्लादेश-नेशनलिस्ट्-पार्टी -बी. एन. पी. इति दलस्य कार्यवाहः अध्यक्षः तारिक-रहमानः संसदीयनिर्वाचनात् पूर्वं अद्य बाङ्ग्लादेशं प्रत्यागतवान्।

•अशेषे हि देशे अद्य क्रिसमस पर्व ईसा मसीहस्य जन्मालक्ष्य हर्षोल्लासेन आमान्यते।

अटल बिहारी वाजपेयी-जन्मदिवस

प्रधानमन्त्री नरेन्द्रमोदी अद्य लखनऊ नगरे पूर्वप्रधानमन्त्रिणं अटलबिहारी वाजपेयी वर्यं समर्पितस्य राष्ट्र प्रेरणा स्थलस्य उद्घाटनं कृतवान् । सः तत्र एकां जनसभां अपि सम्बोधितवान्। पूर्वप्रधानमन्त्रिणः भारतरत्नस्य अटल बिहारी वाजपेयी वर्यस्य एकाधिकैकशततमस्य जन्मदिवसस्य अवसरे लखनऊ-नगरे जनसभां सम्बोधयन् प्रधानमन्त्री उक्तवान् यत् गत एकादश वर्षेभ्यः तस्य सर्वकारः समाजस्य प्रत्येकस्य नागरिकस्य कल्याणाय परिश्रमं कुर्वन् अस्ति तथा च तेभ्यः सर्वाषां योजनानां लाभं कस्यापि पक्षपातं विनैव प्रददाति, एतदेव सुशासनं तथा यथार्थः धर्मनिरपेक्षता अस्ति। सः लखनऊ-नगरे राष्ट्र-प्रेरणा-स्थलस्य उद्घाटनम् अकरोत्, यत् स्वतन्त्रभारतस्य प्रकाशितानां परम्परायाः सम्माने निर्मितम् अस्ति। स्वस्य भाषणे प्रधानमन्त्री अवदत् यत् सर्वकारीय-योजनानां संतृप्तिः तस्य सर्वकारस्य आदर्शवाक्यम् अस्ति, अधुना कोटिशः निर्धन-नागरिकाः ताभिः योजनाभिः लाभान्विताः सन्ति।

प्रधानमन्त्रिणा आरोपितं यत् राष्ट्रिय-नायकानां कृते न्यायं न कृत्वा कांग्रेसदलेन सर्वेषां वस्तु स्थलानां च नामानि केवलं स्वदलस्य नेतृणां नामसु एव स्थापितम्। उत्तरप्रदेशस्य परिवर्तितं चित्रं प्रदर्शयन् प्रधानमन्त्रिणा उक्तं यत् अधुना राज्यं विकासस्य पर्यायपदम् अस्ति। रक्षामंत्री राजनाथसिंहः, राज्यस्य मुख्यमन्त्री योगी आदित्यनाथः, राज्यमन्त्रिणः अन्ये वरिष्ठमन्त्रिणः च अस्मिन् अवसरे उपस्थिताः आसन्।

वाजपेयी- श्रद्धांजलि

राष्ट्रम् अद्य पूर्वप्रधानमन्त्रिणं अटल बिहारी वाजपेयी वर्यं एकोत्तरैकशततमीं जयन्तीमालक्ष्य श्रद्धांजलिम् समर्पयति। अस्मिन् अवसरे राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी.पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च अद्य राष्ट्रियराजधान्यां तस्य समाधौ पुष्पाञ्जलिं समर्पितवन्तः। अपि च पूर्व उपराष्ट्रपतिः एम वेङ्कैया नायडुः , लोकसभा अध्यक्षः ओम बिरला, केन्द्रीय मंत्री जगत प्रकाश नड्डा, भाजपादलस्य राष्ट्रीय कार्यकारी अध्यक्षः नितिन नबीनः, नवदिल्ल्याः मुख्यमंत्री रेखा गुप्ता, अन्ये च गणमान्य जना: तस्मै पुष्पाञ्जलिं समर्पितवन्तः ।

प्रधानमन्त्री सांसद खेल महोत्सव

प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत्, सांसद्-खेल-महोत्सवः जनेषु आन्दोलनरूपेण विकसितः अस्ति, यस्मिन् समाजस्य प्रत्येकस्य वर्गस्य सहभागिता अस्ति। अद्य दृश्य-श्रव्य-माध्यमेन सांसद्-खेल्-महोत्सवं सम्बोधयन् श्रीमोदी अवदत् यत् महोत्सवः देशाय सहस्रशः प्रतिभाशाली क्रीडकाः प्रददाति। प्रधानमन्त्री अवदत् यत्, सांसद-खेल-महोत्सवस्य स्तरं, तस्य प्रभावः च वर्धितः अस्ति।

श्रीमोदीः अवदत् यत्, क्रीडा महोत्सवः युवविकासस्य माध्यमेन राष्ट्रनिर्माणस्य मन्त्रेण सह दृढः स्तम्भः भवति।

राष्ट्रपति- सन्थाली

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य नवदिल्लीस्थ राष्ट्रपति भवने सन्थाली भाषायां संविधानं विमोचितवती।अस्मिन् अवसरे राष्ट्रपतिः अवदत् यत् सर्वेषां संथाली-जनानाम् कृते एतत् गौरवस्य आनन्दस्य च विषयः अस्ति यत् संविधानम् अधुना संथालीभाषायां, ओल्चिकी-लिप्यां च समुपलभ्यते। सा अवदत् यत् संथाली-समुदायस्य जनाः स्वभाषायां संविधानं पठितुं अवगन्तुं च शक्नुवन्ति। अस्मिन् अवसरे उपराष्ट्रपतिः सी.पी. राधाकृष्णन् राष्ट्रपति-द्रौपदी-मुमुवर्यायाः कृते कृतज्ञतां प्रकटितवान्, यया मार्गदर्शने एषः उपक्रमः गृहीतः । सः अवदत् यत् एषः महत्त्वपूर्णः उपक्रमः सन्थाली -भाषा-भाषिणां जनानां कृते संविधानं पठितुं अवगन्तुं च समर्थः भविष्यति ।

मुम्बई- व्यावसायिक - विमानयानानि

नवी मुम्बय्याः अन्तर्राष्ट्रीयविमानस्थानके अद्यारभ्य व्यावसायिक - विमानयानानि

आरब्धानि जातानि। भारतस्य नागर विमाननक्षेत्रस्य कृते एषः महत्त्वपूर्णोपलब्धिः अस्ति। एतत् वायुयान स्थानकम् मुम्बई-महानगरस्य क्षेत्रस्य कृते विमानयात्राक्षमतायाः विस्तारः अपि करोति। नवी मुम्बई अन्तर्राष्ट्रीय विमानस्थानके परिचालनम् आरम्भं कुर्वन् इन्डिगो समवायस्य प्रथमं विमानं, 6E460 बेङ्गलूरुतः आगत्य प्रातः अष्ट वादने नवी मुम्बय्याः अन्तर्राष्ट्रीयविमानस्थानके सम्प्राप्तम्।

बाङ्ग्लादेश- तारिक-रहमानः

बाङ्ग्लादेश-नेशनलिस्ट्-पार्टी -बी. एन. पी. इति दलस्य कार्यवाहः अध्यक्षः तारिक-रहमानः संसदीयनिर्वाचनात् पूर्वं अद्य बाङ्ग्लादेशं प्रत्यागतवान्। युनाईटेड किङ्ग्डम-देशे प्रायः सप्तदशवर्षाणां निर्वासनं समाप्य, सः लंदन-नगरात् बिमान-बाङ्ग्लादेश्-एयरलाईन्स इत्यनेन विमानेन ढाका-नगरं प्राप्तवान्, यत् सिलहट-नगरे अल्पकालं यावत् विरामस्य अनन्तरं प्रातः प्रायः चत्वारिंशन्निमेषाधिक एकादश वादने हज़रत-शाहज-लाल-अन्ताराष्ट्रिय-विमानस्थानके प्राप्तवान्। तारिक रहमान इत्यनेन सह तस्य पत्नी डा. जुबैदा रहमानः, पुत्री जैमा रहमानः च आसीत्। महासचिवस्य मिर्ज़ा फ़खरूल इस्लाम आलंगीर इत्यस्य नेतृत्वे बी. एन्. पी. इत्यस्य वरिष्ठनेतारः विमानस्थानकस्य विशिष्ट विश्रामगृहे तस्य स्वागतं-कृतवन्तः।

बाल दिवस पुरस्कार

राष्ट्रपतिः द्रौपदी मुर्मुः श्वः नवदिल्ल्यां वीर-बाल-दिवसस्य अवसरे 'प्रधानमन्त्री-राष्ट्रीय-बाल-पुरस्कारान्' प्रदास्यति। महिला-बाल-विकास-मन्त्रालयः अवदत् यत् अस्मिन् वर्षे अष्टादश राज्यानां केन्द्रशासितप्रदेशानां च विंशतिः बालकाः अस्य पुरस्कारस्य कृते चयनिताः सन्ति, ये वीरता, क्रीडा, समाजसेवा इत्यादिषु विविधक्षेत्रेषु उत्कृष्टं प्रदर्शनं कृतवन्तः। वीर्-बाल्-दिवसस्य राष्ट्रिय-स्तरस्य कार्यक्रमे प्रधानमन्त्री नरेन्द्रमोदि बालकान् यूनः च सम्बोधयिष्यति इति मन्त्रालयेन सूचितम्।

प्रधानमन्त्री ग्राम सड़क योजना

भारतस्य अत्यन्तप्रभावशालिषु ग्रामीणसंरचनायाः उपक्रमेषु अन्यतमा, प्रधानमन्त्री-ग्राम-सडक-योजना अद्य पञ्चविंशति वर्षाणि पूरयति। पूर्वं असम्बद्धग्रामीणनिवासानां सर्व-ऋतु-सम्पर्कं सुनिश्चेतुं द्विसहस्रतम वर्षस्य दिसम्बर मासस्य पञ्चविंशति दिनाङ्के आरब्धा एषा योजना कृषि-विकासस्य, वृत्यावसर-निर्माणस्य, शिक्षायाः स्वास्थ्यसेवानां च उन्नत-प्रवेशस्य,

निर्धनाता-निवारणस्य च कृते प्रमुख-सहयोगरूपेण उद्भूतम्।

## उपराष्ट्रपति मार्ग दुर्घटना

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्य तमिळुनाडुराज्यस्य कुड्डालोर-नगरे मार्गदुर्घटनायां मृतानां जनानाम् प्रति शोकं प्रकटितवान्। सामाजिकान्तर्जलीये सन्देशे उपराष्ट्रपतिः पीडितपरिवारान् प्रति शोकं प्रकटितवान्। दुर्घटनायां ये व्रणिताः तेषां शीघ्र-स्वस्थ्याय सः प्रार्थितवान्।

## क्रिसमस

अशेषे देशे क्रिसमस पर्व हर्षोल्लासेन सह आमान्यते। क्रिसमस पर्व ईसा मसीहस्य जन्मनः उल्लासे मन्यमानेषु प्रमुखः उत्सवोऽस्ति । राष्ट्रपतिः द्रौपदी मुर्मुः देशवासिभ्यः शुभकामनाः प्रदत्तवती।